International Journal of Applied Research 2022; 8(7): 545-546




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2022; 8(7): 545-546
www.allresearchjournal.com
Received: 26-05-2022
Accepted: 30-06-2022

**हरेश्वर पाण्डेय**
रूपी वगही, वगहीबाजार,
गोपालगंज, बिहार, भारत

**Corresponding Author:**
रूपी वगही, वगहीबाजार,
गोपालगंज, बिहार, भारत

# व्याकरणे पाणिनीयव्याकरणस्य स्थानम्

**हरेश्वर पाण्डेय**

**सारांशः**
व्याकरणमिदं त्रिमुनिव्याकरणं कथ्यते। तत्र त्रयो मनुयः सन्ति पाणिनिः, कात्यायनः पतञ्जलिश्च। पाणिनिः सूत्रकारः कात्यायनः वार्तिककारः पतञ्जलिश्च महाभाष्यकारः। तत्र पाणिनेरनेकानि नामानि दाक्षीपुत्रः पाणिनिः पाणिनः इत्यादीनि। तेषु पाणिनिरिति नामसर्वातिप्रसिद्धं निर्विवादं च।

**कूटशब्दः** पाणिनीयव्याकरणस्य, पाणिनिः, नामसर्वातिप्रसिद्धं

## प्रस्तावना

पाणिनीयव्याकरणं संस्कृतभाषायाः परिज्ञानायास्माकं निधिस्वरूपं वर्तते। यद्यपि ऐन्द्रचान्द्राद्यनेकव्याकरणशास्त्राणामुल्लेखः बहुत्र विद्यते, तथापि चर्चितेषु व्याकरणेषु केषाञ्चित् नाम एव श्रूयते, कानिचित् अपूर्णानि, कानिचित् पूर्णानि सन्त्यपि लौकिवैदिकोभयशब्दसाधकत्वासम्प्रति पाणिनीयव्याकरणमेव सर्वग्राह्यं विद्यते। अनेन देववाण्याः प्राचीनार्वाचीनं समस्तवाङ्मयं सूर्यस्यालोकेनेव प्रकाशमानं दृश्यते। अस्यात्यन्तं सुन्दरं सुसम्बद्धं सूक्ष्मतमं च पदार्थद्योतनस्य क्षमतापूर्णं निर्माणंदृष्ट्वा विद्वांसः मुक्तकण्ठेन प्रशंसां कुर्वन्ति। भारतीय–प्राचीनाचार्याणां सूक्ष्मचिन्तनस्य सुपरिपक्वज्ञानस्याद् भुतप्रतिमायाश्च निदर्शकः असौ अनुपमग्रन्थः। अनेनदेववाणी परमागौरवान्वितास्ति। संसारे कस्या अपि इतरप्राचीनार्वाचीनभाषायाः एतादृशं व्याकरणं न विद्यते। अस्य व्याकरणस्य प्रशंसा वैदेशिका अपि कुर्वन्ति। आङ्गलदेशस्य प्रो॰मोनियरः विलियम्सः कथयति यत् संस्कृत–व्याकरणं मानवमस्तिष्कस्य प्रतिभाया आश्चर्यतममुदाहरणमस्ति। जर्मणदेशजः प्रो0 मूलरः लिखति–हिन्दूनां व्याकरणान्वयस्य योग्यता संसारस्य कस्या अपिजात्याः व्याकरणात् उच्चतमा। सत्यम् एतत् सुपरिष्कृतव्याकरणे अनेके ग्रन्थाः रचिताः। यथा आचार्य कात्यायनस्य वार्तिकग्रन्थः, महामुनेः पतञ्जलेर्महाभाष्यम्, भट्टोजिदीक्षितस्य सिद्धान्तकौमुदी, प्रौढ़मनोरमा च वरदराजभट्टाचार्यस्य लघुसिद्धान्तकौमुदी पदवाक्य प्रमाणस्य नागेशभट्टस्य लघुशब्देन्दुशेखरः परमलघुमञ्जूषा इत्यादि, आचार्य– कौण्डभट्टस्य वैयाकरणभूषणसारः, महावैयाकरणभर्तृहरेः वाक्यपदीयमादि।

एषु ग्रन्थेषु विभिन्नाः टीकोपटीकाश्च लिखिता अस्य सम्बृहत्तायाः परिचायिकाः। उभयविधिनियमेन लौमिकसंस्कृते वैदिकसंस्कृते च अस्याः प्रतिष्ठा अधिकावरीवर्ति यदन्यव्याकरणेषु न वर्तते। वर्णोच्चारणकल्पना, सूत्रकल्पना प्रत्ययादिकल्पना, धातुपाठकल्पना, उणादिसूत्रपाठकल्पना आदितोऽपि अधिकमहत्त्वपूर्णाः। अस्य निष्पतिर्द्विधा समुपलभ्यते प्रथमातावत् पणिन्शब्दादणिकृते इञि च। द्वितीया अकारान्तात् पणिन्शब्दात् इञि। पाणिनः इति नामकाशिकायां 6.2.14 चान्द्रवृत्तौ 2.2.68 च समुपलभ्यते। दाक्षीपुत्र इति नाम महाभाष्ये निर्दिष्टम्। शालातुरीयः काशिका– विवरपञ्जिकायां गणरत्न महोदधौ

काव्यालंकारे परिदृश्यते। म0म0 पं0 शिवदत्तशर्मा पाणिनेः पितुर्नाम शलंकः इतिनाम पितृव्यदेशजं मनुते। स एव पाणिनेः पितुर्नाम शलङ्क इति नाम व्याजहार। पतञ्जलिमहाभाष्ये पाणिनं दाक्षीपुत्रत्वेन स्वीचकार गोत्र प्रत्यान्तोऽयं शब्दः। अनेनसिध्यति यत् पाणिनेर्माता 'दाक्षी' दक्षकुल संभूता। शोभना खलु दाक्षायणस्य संग्रहस्य कीर्तिः इति महाभाष्ये पतञ्जलिः। क्षत्रव्याडेर्नाम दाक्षिणात्यत्वेन निर्दिष्टम्। अनेन व्यज्यते यत् दाक्षायणः पाणिनेर्मातुलपुत्रो भवेत्। केचन व्याडिं पाणिनेर्मातुल इति निश्चीयते। अनेनानुमीयते यत् दाक्ष्याः पितुर्नाम व्यड इत्यासीत्। छन्दः शास्त्रस्य रचयिता पिङ्गलः पाणिनेः अनुज आसीदिति,, एवं कौत्सकात्यायनौ पाणिनेरन्तेवासिनौ।

वर्धमानकृते गणरत्नमहोदधौ शलातुरो नामग्रामः सोऽमिजनोऽस्यास्तीति शालातुरीयः तत्र भवान पाणिनि इति। अष्टाध्याय्यामपि पाणिनिः शलातुरशब्दादभिजनेऽर्थे शालातुरीय पदसिद्धिं स्वीचकार सम्प्रति स्थानं लाहुर इति मन्यते। पाश्चात्यैर्विद्वद्भिः पाणिनेः समयो विक्रमाब्दात् 657 पूर्वतः 258 विक्रमवर्ष यावत् स्वीकृतः। अन्तः साध्यभूतं बहुभिः प्रमाणैः अस्य समयो विक्रमाब्दात् 2900 वर्ष पूर्व मन्यते।

### अस्य व्याकरणग्रन्थाः

अष्टाध्यायी, धातुपाठः, गणपाठः, लिङ्गानुशासननम् शिक्षाग्रन्थश्च। इतः परं जाम्बतीविजयनामकं काव्यमपि रचितम्। अस्य व्याकरणस्य साक्षात् सम्बन्धो माहेश्वर सम्प्रदायेन सह वर्तते। पाणिनीय व्याकरणस्य नामानि अष्टकम् अष्टाध्यायी, शब्दानुशासनम्, वृतिसूत्रञ्चेति।

अस्य मृत्युविषयकः संकेतः पञ्चतन्त्रस्य प्रसंगाविशेषादित्थमुपलभ्यते 'सिंहो व्याकरणस्य कर्तुरहरत प्राणान् प्रियान् पाणिनेः'। निधनतिथिः त्रयोदशी इति। यतोऽद्यापि त्रयोदशी अनध्याय दिवसरूपेणः स्मर्यते तदनुयाचिभिः।

### अस्यप्रशस्ति

परवर्तिभिराचार्यैः स्थाने–स्थाने प्रशंसित आचार्य पाणिनिः। तत्र प्रथमं पतञ्जलिः महाभाष्ये– 'सामर्थ्ययोगान् नहि किंचिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्। अत्र पाणिनीय व्याकरणेन सूत्राणां परस्परं सम्बन्धसामर्थ्यमवलोक्य न किम्प्यनर्थकं दृग्गोचरता यातीति पतञ्जलेर्मतम्।'

उदक् च विपाशः सूत्रवृत्तिप्रसंगे पतञ्जलिः साश्चर्यं निर्दिशति यत् महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्येति।

ऋग्वेदस्य भाष्यकारो वेंकटमाधवः पाणिनिमधिकृत्य लिखति यत् महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्येति।

ऋग्वेदस्य भाष्यकारो वेंकटमाधवः पाणिनिमधिकृत्य लिखतियत् शाकल्यः, पाणिनिः, यास्कः 'इत्यृगर्थपरास्त्रय' अर्थात् ऋग्वेदस्य सम्यक् ज्ञातारस्त्रय एव तेष्वन्यतमः पाणिनिः। अतएव स्वकीयाष्टाध्याय्यां स्वरविशेष परिज्ञानार्थं प्रायः 400 सूत्राणामुल्लेखोऽकारि पाणिनिना इति।

पाणिनीय व्याकरणे स्थितानां सूत्राणां षड्विधं लक्षणं प्रदर्शितम्।

### तद्यथा

1- संज्ञा संज्ञिसम्बन्धबोधकं सूत्रं–संज्ञासूत्रम्, यथा– 'वृद्धिरादैच'[1] 'अदेङ्गुणः [2] शेषोध्यसखि [3]।
2- अव्यवस्थायां व्यवस्थासंपादकं सूत्रं परिभाषासूत्रम्, यथा– 'तस्मादित्युत्तरस्य'[4] मिदचोऽन्त्यातपरः[5], 'इकोगुणवृद्धी'[6]
3- आदेशादिविधायकसूत्रम् विधिसूत्रम्, यथा– 'इकोयणचि'[7] 'ह्रस्वनद्यापोनुट्'[8] 'एरच'[9]
4- प्राप्तस्यविधेर्नियामकं सूत्रम् = नियमसूत्रम्। यथा– 'रात्सस्य'[10]।
5- अतस्मिन् तद्धर्माऽऽपादकं सूत्रम्–अतिदेशसूत्रम्।
6- यथा– 'सख्युरसम्बुद्धौ' गोतोणित्[11] 'लोटोलङ्वत्'[12]।

उतरोत्तरस्वार्थसम्पर्क सूत्रम्–अधिकार सूत्रम्। यथा ङ्याप्प्रातिपदिकात्[13] 'आर्घधातुके'[14] 'पूर्वत्रासिद्धम्'[15] इति। पाणिनीय व्याकरणस्य मुख्यं प्रयोजनं शब्दानुशासनं विद्यते।

निष्कषरूपेण एतानि च व्याकरणानि स्वसमकालिकसंस्कृतसाहित्यमुपजीव्य लक्ष्यैकचक्षुष्कैराचार्यैः स्वनाम्नैव प्रख्यापितानि। ''व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणमिति। इदमेव शब्दान्तरेण शब्दानुशासनमपि कथ्यते। अनुशिष्यन्ते असाधुशब्देभ्यो = विविच्य साधु शब्दाः पृथक् क्रियन्ते। अनुशासनं हि शब्दानां लौकिकवैदिकोभयविधानामनुशासनमितिशब्दानुशासनम्। शब्दानुशासनमिति नामकरणं प्रथमं भगवता पतञ्जलिना प्रदर्शितम् यथा– 'अथशब्दानुशासनम्' अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते, शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्। अस्मिन् शास्त्रे शब्दानां खलु प्रकृतिप्रत्ययविभाजनं कृत्वा साधुतया तद् व्युत्पादनप्रकारः अर्थानुसंधानप्रकारश्च दर्शितः। उक्तं हि–'न केवलाः प्रकृतिः प्रयोक्तव्या नापि केवलप्रत्ययः, अथवा 'अपदं न प्रयुञ्जीत' अर्थात् प्रकृति–प्रत्ययसमुदितो हि शब्दः वदतां प्रयोगार्ह इति च लभ्यते।

### संदर्भाः

1. पाणिनिसूत्रम् –1/1/1।
2. पाणिनिसूत्रम् –1/1/2।
3. पाणिनिसूत्रम् –1/4/7।
4. पाणिनिसूत्रम् –1/1/67।
5. पाणिनिसूत्रम् –1/1/47।
6. पाणिनिसूत्रम् –1/1/3।
7. पाणिनिसूत्रम् 6/1/77,।
8. पाणिनिसूत्रम् 7/1/54।
9. पाणिनिसूत्रम् 3/3/56।
10. पाणिनिसूत्रम् 8/2/24।
11. पाणिनिसूत्रम् –7/1/90।
12. पाणिनिसूत्रम् 3/4/85।
13. पाणिनिसूत्रम् 4/1/1।
14. पाणिनिसूत्रम् 6/4/46।
15. पाणिनिसूत्रम् –8/2/1।